कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र M231 विषय वैदिक
नाव. स्थालीपाक (mss)
लेखक/लिपीकार महादेव बाळंभट्ट जोगळेकर
पृष्ठ 9 काळ शके 1757. पूर्ण/अपूर्ण

॥ छ ॥ ॥ छ ॥ अथ स्थालीपाकप्रारंभः ॥ छ ॥ ॥ छ ॥ छ ॥ छ ॥

तत्रेदानीं पौर्णमासेनैव यक्ष्ये ॥ स्थालीपाकेन

स्था॰ क॰ ॥१॥

॥श्रीगणेशाय नमः॥ हरिः ॐ॥ अथ स्थालीपाकप्रारंभः॥ अद्येत्यादि
पूर्वोच्चरित॰ ॥ फलप्राप्त्यर्थं ॥ दर्शपौर्णमासस्थालीपाकाभ्यां यक्ष्ये॥ भ्यां
तदंगहोमं कर्तुं स्थंडिलादि सर्वं कर्म करिष्ये॥ गोमयादि लिप्ते शुद्धे
देशे शुद्धमृदा ईशान्यारंभमुदक्संस्थं चतुरंगुलोन्नतमंगुलोन्न
तया॥ चतुर्दिक्षु मिलितादिः सप्तसंगुलपरिधिकं फलितं नमष्टादशां
गुलमध्योन्नतं स्थंडिलं कुर्यात्॥ तद्गोमयेन प्रदक्षिणमुपलिप्य॥ द
क्षिणेष्टो उदीच्यां द्वे प्रतीच्यां चतुः प्राच्याम र्धमितं संगुलानि त्युक्ता॥
दक्षिणोपक्रमामुदक्संस्थां प्रादेशमात्रामेकां लेखां तस्या दक्षिणो
त्तरयोः प्रागायते पूर्वलेखया असंस्पृष्टे प्रादेशसंमिते द्वे लेखे लिखि दामृ
त्वा॥ तयोर्मध्ये परस्परमसंस्पृष्टा उदक्संस्थाः प्रागायता प्रादेश ॥१॥

संमितास्तिस्रश्च तिस्रो लेखा याज्ञियशकलमूलेन दक्षिणहस्तेनोल्लिख्य
लेखासु तत्र छकलमुत्तरतो निधाय स्थंडिलमद्भिरभ्युक्ष्य शकलमा
ग्नेय्यां निरस्य पाणिं प्रक्षाल्य वाग्यतो भवेत्॥ अप उपस्पृश्य॥ जुष्टोद
मूना आत्रेयो वसुश्रुतोऽग्निस्त्रिष्टुप्॥ एह्यग्ने राहुगणो गौतमोऽग्निस्त्रि
ष्टुप्॥ अग्न्यावाहने विनियोगः॥ ॐ जुष्टो दमूना॥ मनसाय देवान्॥
इत्यक्षतैरावाह्य॥ आच्छादनं दूरीकृत्य॥ समस्तव्याहृतीनां परमेष्ठी
प्रजापतिः प्रजापतिर्बृहती॥ अग्निप्रतिष्ठापने विनियोगः॥ भूर्भुवस्व
रोम्॥ बल्वर्द्धनामानमग्निं प्रतिष्ठापयामि॥ प्रोक्षितं धनानि निक्षिप्य॥
वेणुधमन्या प्रबोध्य ध्यायेद्देवं॥ चत्वारि शृंगा गौतमो वामदेवोऽग्नि
स्त्रिष्टुप्॥ अग्निमूर्तिध्याने विनि॥ चत्वारि शृंगा॰ ऋचा॥ एवंरूपहुताशन॥
अग्ने वैश्वानर शांडिल्यगोत्र मेषध्वज प्राङ्मुख मम सन्मुखो वरदो भव॥

पौर्णमास्यां दर्शे अग्निमिंद्राग्नी च प्रधानं ४

स्था॰ क॰ ॥२॥

समिद्ध्यमादाय॥क्रियमाणे दर्शपौर्णमासस्थालीपाकहोमे देवतापरि
ग्रहार्थमन्वाधानं करिष्ये॥अस्मिन्नन्वाहितेऽग्नौ जातवेदसमग्निमिध्मे
न प्रजापतिं प्रजापतिं चाघारदेवते आज्येन अग्निषोमौ चक्षुषी आज्ये
न अत्र प्रधानं॥अग्निं [illegible] अग्निषोमौ च प्रधानदेवते चरुद्रव्येण॥शेषे
ण स्विष्टकृतमग्निमिध्मसंनहनेन रुद्रमयासमग्निं देवान्विष्णुम
ग्निं वायुं सूर्यं प्रजापतिं चैताः प्रायश्चित्तदेवता आज्येन ज्ञाताज्ञात
दोषनिबर्हणार्थं त्रिवारमग्निं मरुतश्चाज्येन विश्वान्देवान्संस्रा
वेण अंगदेवताः प्रधानदेवताः सर्वाः सन्निहिताः संतु एवं सांगो
पांगेन कर्मणा सद्यो यक्ष्ये॥समस्तव्याहृतीनां परमेष्ठी प्रजापतिः
प्रजापतिर्बृहती॥अन्वाधानसमिद्धोमे विनियोगः॥ॐ भूर्भुवस्व
स्वाहा॥प्रजापतय इदं॥इध्माबर्हिषोश्च संनहनं॥परिसमूहनं॥ ॥२॥

अग्नीषोमाभ्यां त्वा जुष्टं निर्व॰

ये त्वा जु॰

र्भिरग्नये त्वा जुष्टं प्रोक्षामीति निर्वापसंख्यया प्रोक्षयेत्॥दर्शे अ
ग्नीषोमाभ्यां त्वा॥इंद्राग्नीभ्यां त्वादि निर्वपः प्रोक्षयेत्॥पात्राणा
मुत्तरतः प्राग्ग्रीवमास्तीर्णे ऊर्ध्वलोम्नि कृष्णाजिने निहिते उलूख
ल मुसलेन पत्न्या वा हस्तः त्रिः शुक्लीकुर्यात्॥तांस्त्रिः प्रक्षालितां
न्पृथक्पात्रे वा आग्निरग्धमन वृत्राविलमंन रूष्भप क्वं सुसृतं
चरुं पचेत्॥ततः ते पवित्रे आज्यपात्रे निधाय तत्पात्रं पुरतः संस्थाप्य॥
तस्मिन्नाज्यमासिच्य अग्नेरुत्तरतः स्थितानंगारान् भस्मना सहि
तानुदक्परिस्तरणाद्बहिर्निरूह्य॥तेष्वाज्यपात्रमधिश्रित्य ज्वल
ता दर्भोल्मुकेन पर्यग्निस्या॥अंगुष्ठपर्वमात्रं प्रक्षालितं दर्भाग्रद्वयं मा
ज्ये प्रक्षिप्य॥पुनर्ज्वलता तेनैव दर्भोल्मुकेन चरुणा सहाज्यं त्रिः प
र्यग्निकृत्वा॥तदुल्मुकमपास्याज्यपात्रं भुवि कर्षन्निधाय उद्वास्य॥

स्था॰ क॰
॥ ४ ॥

गारान्नग्नौ प्रतप्यापस्पृष्ट्वा तत्रस्थमेवाज्यं ॥ सवितुष्ट्वा हिरण्यस्तू
पः सविता पुर उष्णिक् ॥ आज्यस्योत्पवने विनियोगः ॥ ॐ सवितुष्ट्वा
प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिः ॥ प्रागु
त्पुनाति ॥ सकृन्मंत्रेण द्विस्तूष्णीं ॥ ते पवित्रे अद्भिः प्रोक्ष्याग्नौ
प्रहरेत् ॥ तूष्णीं ॥ स्कंदाय स्वाहा स्कंदायेदं ॥ अथाग्नेः पश्चा
त्परिस्तरणाद्बर्हिरासनोपरितो भूमिं प्रोक्ष्य ॥ तत्र बर्हिः सन्नहनीं
रज्जुमुदगग्रां प्रसार्य तस्यां बर्हिः प्रागग्रमुदगपवर्गमविरल
दर्भमास्तीर्य तस्मिन्नाज्यपात्रं निधाय स्रुवादिसंमार्जयेत् ॥
दक्षिणहस्तेन स्रुक्स्रुवौ गृहीत्वा ॥ सव्येन कांश्चिद्दर्भानादा
य सहैवाग्नौ प्रताप्य स्रुच्यं निधाय ॥ स्रुवं संमृज्य ॥ अभ्युक्ष्य ॥ ६ ॥

प्रतितप्य ॥ आज्यादुत्तरतो बर्हिष्यासाद्य ॥ पुनरप्यत्राभिघार्यागं
धाक्षतपुष्पैरग्निं समंत्रमभ्यर्च्य ॥ विश्वानि न इत्यनयोर्वसुश्रु
तोग्निस्त्रिष्टुप् ॥ द्वाभ्यामर्चने अंतोपस्थाने विनियोगः ॥ ॐ विश्वा
नि नो दुर्गहा जातवेदश्श ऋ॰ क॰ ॥ रयिं नश्चात्ते स्वस्ति ॥ आत्मानं चा
लंकृत्य ॥ हस्तं प्रक्षाल्य ॥ इध्मबंधनरज्जुमिध्मस्थाने निधाय ॥
पाणिनेध्ममादाय मूलमध्याग्रेषु स्रुवेण त्रिरभिघार्य ॥ मूलम
ध्ययोर्मध्यभागे गृहीत्वा ॥ अयंते वामदेवो जातवेदा अग्निस्त्रि
ष्टुप् ॥ इध्महवने विनियोगः ॥ ॐ अयंत इध्म आत्मा जातवेदस्ते
नेध्यस्व वर्धस्व चेद्धवर्धय चास्मान् प्रजया पशुभिर्ब्रह्मवर्चसे
नान्नाद्येन समेधय स्वाहा ॥ जातवेदसेग्नय इदं ॥ स्रुवेणाज्य

स्था॰क॰ ॥५॥

मारुताय वायव्यदिशि मारभ्याग्नेयकोणपर्यंतं ॥ प्रजापतये स्वाहा
प्रजापतय इदं ॥ निर्ऋतीदिशिमारभ्य ईशानिपर्यंतं ॥ प्रजापत
ये स्वाहा प्रजापतय इदं ॥ अग्नये स्वाहा ॥ अग्नेरुत्तरपार्श्वे पूर्वभा
गे हुता ॥ सोमाय स्वाहा सोमाय इदं ॥ अग्ने दक्षिणपार्श्वे ॥ अग्नि
षोमाभ्यां स्वाहा ॥ अग्निषोमाभ्यामिदं ॥ पंचावतीतु हविर्भागेषु
ये पितुत्तरार्धात्पूर्वार्धाच्च द्विरवदाय ॥ पात्रस्थमनभि
घार्य अवत्तं तु द्विरभिघारयेत् ॥ यदस्येति हिरण्यगर्भो ऋषिः स्वि
ष्टकृदग्निर्देवता ॥ स्विष्टकृद्धोमे विनियोगः ॥ यदस्य कर्मणोत्यरी
रिचं यद्वान्यूनमिहाकरं ॥ अग्निष्टत्स्विष्टकृद्विद्वान्सर्वं स्विष्टं सुहु
तं करोतु मे ॥ अग्नये स्विष्टकृते सुहुतहुते सर्वप्रायश्चित्ताहुती ॥५॥

अग्नये॰
अग्नय इ॰
दं ई अग्न॰
इंद्राग्निभ्यां
स्वा॰

नां सर्वान्कामान्समर्धय स्वाहा ॥ अग्नये स्विष्टकृत इदं ॥ अग्नेरुत्त
रतः स्थितामभिध्वं बंधनरज्जुं विसृजस्या ॥ रुद्राय पशुपतये स्वा
हा ॥ रुद्राय पशुपतय इदं ॥ अप उपस्पृश्य ॥ स्रुवेण प्रायश्चित्ता
आज्य सप्त जुहुयात् ॥ अथ मंत्रः ॥ अयाश्चेति विमदो अयाश्चा
ग्निः पंक्तिः ॥ प्रायश्चित्ताज्यहोमे विनियोगः ॥ ॐ अयाश्चाग्ने ॥
यानो धेहि भेषजं स्वाहा ॥ अयस्याग्नय इदं ॥ अतो देवा मेधाति
थिर्गायत्री ॥ प्रायश्चित्ता ॥ अतो देवा ॥ धामभिः स्वाहा ॥ देवेभ्य
इदं ॥ इदं विष्णुर्मेधातिथिर्गायत्री ॥ प्रायश्चि॰ ॥ इदं विष्णु ॥ सु
रे स्वाहा ॥ विष्णव इदं ॥ व्यस्तसमस्तव्याहृतीनां विश्वामित्रजम
दग्निभरद्वाजभृगव ऋषयः ॥ अग्निर्वायुसूर्यप्रजापतयो देवता

२ विष्णु

स्था॰ कृ॰ ॥ ६॥६

गायत्र्युष्णिगनुष्टुप् बृहत्यश्छंदांसि ॥ सर्वप्रायश्चित्ताज्य होमे वि
नियोगः ॥ ॐ भूः स्वाहा ॥ अग्नय इदं ॥ भुवस्वाहा ॥ वायव इदं ॥
स्वस्वाहा ॥ सूर्याय इदं ॥ ॐ भूर्भुवस्व स्वाहा ॥ प्रजापतय इदं ॥
अनाज्ञातमिति मंत्रस्य हिरण्यगर्भो ग्निरनुष्टुप् ॥ ज्ञाताज्ञात
दोषनिबर्हणार्थं प्रायश्चित्ताज्य होमे विनियोगः ॥ ॐ अनाज्ञा
तं यदाज्ञातं यज्ञस्य क्रियते मिथु ॥ अग्ने तदस्य कल्पय त्वं ॱ य
थातथ ॱ स्वाहा ॥ अग्नय इदं ॥ पुरुषसंमितो यज्ञो यज्ञः पुरुषः
संमितः ॥ अग्ने तदस्य ॥ अग्नय इदं ॥ यत्पाकत्रेत्यस्य त्रितो
ग्निस्त्रिष्टुप् ॥ प्रायश्चित्ते ॥ यत्पाकत्रा ॥ यजातिः स्वाहा ॥ अग्नय
इदं ॥ यद्वो देवा अतिपातयामरुतस्त्रिष्टुप् ॥ मंत्रतंत्रविपर्यासादि

हि वेत्थ

॥ ६ ॥

अग्ने त्वन्नो अंतम उत त्राता शिवो भवा वरूथ्यः ॥ वसुरग्निर्वसुश्रवा
अच्छा नक्षि द्युमत्तमं रयिं दाः ॥ स नो बोधि श्रुधी हवमुरुष्या णो अ
घायतः समस्मात् ॥ तं त्वा शोचिष्ठ दीदिवः सुम्नाय नूनमीमहे
सखिभ्यः ॥ ॐ मानस्तोके इति कुत्सो रुद्रो जगती ॥ विभूतिग्र
हणे विनियोगः ॥ ॐ मानस्तोके तनये मा न आयौ मा नो गोषु मा
नो अश्वेषु रीरिषः ॥ वीरान्मा नो रुद्र भामितो वधीर्हविष्मंतः
सदमित्त्वा हवामहे ॥ त्र्यायुषं जमदग्नेरिति ललाटे ॥ कश्य
पस्य त्र्यायुषमिति कंठे ॥ अगस्त्यस्य त्र्यायुषमिति नाभौ ॥ यद्दे
वानां त्र्यायुषमिति दक्षिणस्कंदे ॥ तन्मे अस्तु त्र्यायुषमिति वा
मस्कंदे ॥ सर्वमस्तु शतायुषमिति शिरसि ॥ ॐ चमे स्वरश्च मे

स्था॰ कं
॥८॥

यज्ञोपचलेनमश्वा ॥ यत्तेन्यूनं तस्मै तउपयत्तेअतिरिक्तं तस्मै
तेनमः ॥ परिस्तरणान्युत्तरे विसर्जयेत् ॥ अग्निं परिसमुहनं ॥
पर्युक्षणं ॥ अभ्यर्चनं ॥ ॐ विश्वानि नो दुर्गहा जातवेदः ॥ सिंधुं
नावा दुरितातिपर्षि ॥ ॐ अग्ने अत्रीवन्नमसा गृणानः ॥ ॐ
अस्माकं बोध्यविता तनूनां ॥ ॐ यस्त्वा हृदा कीरिणा मन्य
मानः ॥ ॐ अमर्त्यं मर्त्यो जोहवीमि ॥ जातवेदो यशो अस्मासु
धेहि ॥ प्रजाभिरग्ने अमृतत्वमश्यां ॥ यस्मै त्वं सुकृते जातवे
द उ लोकमग्ने कृणवः स्योनं ॥ अश्विनं सपुत्रिणं वीरवंतं गोमं
तं रयिं नशते स्वस्ति ॥ आत्मानं चालंकृत्स ॥ हस्तं प्रक्षाल्य ॥
अग्निपूजनं ॥ अग्निस्तु विश्रवस्तमं ॥ तु विब्रह्माणमुत्तमं ॥ ॥८॥

अतूर्तं श्रावयत्पतिं पुत्रं ददाति दाशुषे ॥ अग्नये नमः मंत्रपुष्पं स
मर्पयामि ॥ यस्य स्मृत्या च नामोक्त्या होमयज्ञक्रियादिषु ॥
न्यूनं संपूर्णतां याति सद्यो वंदे तमच्युतं ॥ गच्छ गच्छ सुरश्रे
ष्ठ स्वस्थान परमेश्वर ॥ यत्र ब्रह्मादयो देवास्तत्र गच्छ हुता
शन ॥ इति स्थालीपाक समाप्तः ॥ श्री काशीविश्वेश्वरार्पण
मस्तु ॥ छ ॥ शाके १७८८ पराभवनाम संवत्छरे माघे मासे
शुक्लपक्षे सप्तम्यां तिथौ रविवासरे ॥ इदं पुस्तकं जोगळे
कर इत्युपनामक बाळंभट्टस्य सूनू माहादेवेन लिखितं ॥
॥ छ ॥ स्वार्थं परोपकारार्थं च ॥ शुभं भवतु श्रीदत्तात्रय ॥ छ ॥

स्था॰क॰
॥१॥
॥छ॥ इति स्थालीपाक समाप्तः ॥ छ॥
॥१॥